॥ श्रीः ॥

मद्रपुरी-आकाशवाणी-रङ्गे प्रयुक्तमिदम् ।

॥ कामशुद्धिः ॥

डाक्टर् राघवेण सन्दृब्धा

स्रष्ट्रीं तामीशितुश्शक्तिं प्रपद्ये कामनामिकाम् ।

संपद्यतां स मे ब्राह्मो रसो रतिरितीरितः ॥

(प्रविश्य)

कविः:- मन्ये, अलमेतावता पूर्वरङ्गेण । अल्पारम्भः क्षेमाय ।

(प्रविश्य)

मित्रम् - सखे किमद्य आरभ्यते, यस्यैवं महान् क्षेमोदर्क आशास्यते ?

कविः:- अद्य रङ्गवेद्यां लघुं कञ्चन चाक्षुषं क्रतुं प्रवर्तयितुमुत्सुकोऽस्मि ।

मित्रम् - अनाहूतोऽध्वरं गच्छेदिति अहमपि प्राप्त इव।

कविः:- साधु, सखे, जितं सौहार्देन सारस्येन च । आराधनानां परममेतत्, चिदभ्रविभ्रमभगवदुपज्ञं भारतर्षं नाट्यम् । गुणानां सदुदयोऽद्य प्रहर्षयति नश्चेतः । वैजयिकोऽयं मुहूर्तश्शारदान-

वरात्रमहोत्सवशेखरीभूतः । विविच्य कविता गुम्फिताश्शब्दा इव चात्र संस्कृतसेवासमितौ मिलितास्सर्व एव रसवन्तः । अवसरश्चाधुना कविसार्वभौमस्य समर्हणम् । कथं नाम सांप्रतं न नटिष्यति हृदयं हृदयालोः ?

मित्रम् - किं तत्प्रारिप्स्यमानं नाट्यं, यत्पर्याप्नोति निजगुणैरेतावन्तमुदात्तं सन्दर्भमुपस्कर्तुम् ? कश्चायमुत्साहो कवि । ?

कविः- सखे, कस्य वा संस्कृतप्रणयिनो न विदिता अनितरसुलभानुकारपाण्डित्यप्रक्रियाःपरस्परोपस्कारिप्राच्यप्रतीच्यविद्यासंपत्त्यसाधारणाः कुलपतयः कप्पुस्वामिशास्त्रिणः । तेषां जयपताकास्विव दिक्षु विद्योतमानेषु शिष्येष्वन्यतमो, राघवो नाम,-

मित्रम् - ननु त्वमेव !

कविः- (सस्मितम्) अहमद्य परिषदमेनामाराधयितुमुत्सहे स्वसन्दृब्धेन कामशुद्धिनाम्ना एकाङ्करूपकेण ।

मित्रम् - किमिदं कामशुद्धिर्नाम वस्तु ?

कविः- वस्तु चैतत् कवेः कालिदासस्य कुमारसंभवात् महाकाव्यादुत्थितम् , तस्य हृदयभूतम् । अत्र नायिका रतिः, न पार्वती । नायकश्च मदनः, न परमेश्वरः ।

मित्रम् - वैचित्र्येषा वर्धयति नः कौतूहलम् । कदा च यवनिका अपसरिष्यति?

कविः- अपसृतैव। किन्तु कथमन्या यवनिकात्र ? आः, ज्ञातम् । एष मदनमहिष्या रतेः प्रासादैकदेशः कोपागारः । मन्ये देव्या रत्यात्र 'सत्याग्रहः' क्रियत इति । श्रूयत एवास्याः ~~दीर्घदीर्घो~~ निष्श्वासः ।

(ततः प्रविशति यवनिकान्तरितविग्रहा रतिः)

(प्रविशति कतिपयनिमेषानन्तरं मन्दमन्दं मन्मथः। अपटीमपक्षिप्य पश्यति विस्रस्तमूर्धजं विपर्यस्ताङ्गकं शयानां निःश्वसतीं रतिम्।)

कामः- ऊष्मेव भक्ष्यस्य, वक्रिमेव वचसः, कामपि कान्ति माधत्ते कोपोऽस्याः शरीरस्य। अथवा निरोज इव साहित्यं, निर्मन्यु प्रेम केवलपेशलिम्ना पर्यवस्यत्यरुचौ।

(इति उपसृत्य कान्तां कचेषु स्पृशति। सा च तस्य हस्तं अवक्षिपति)

रतिः- अलं चाटुभिः। अतिलघ्वी चिकित्सा समादृता।

कामः- प्रिये, कोऽयं सहसा अत्यारूढः कोपरोगः? किमपराद्धमनेन त्वच्छन्दानुवर्तनैकसमाहितचेतसा मया? अद्य नूतनापदानकीर्तिकुसुमोत्तंसलालसस्तव साहाय्यमपेक्षमाणस्त्वरयात्र समागतोऽस्मि। अपश्यंश्च त्वां भोगागारे, शृण्वंश्च त्वां कोपागारप्रविष्टां भग्नहृदयः, न जाने, किंकुर्यां, कथं वा त्वां प्रसादयेयमिति। अद्य संमोहनेन विश्वामित्रं रम्भायाः कुंभदासं करिष्यामीति देवेन्द्राय प्रतिज्ञातवानस्मि।

रतिः- (कर्णौ पिधाय) अविहा, अविहा। अलमेतैरपदानैः, अथवा अपवादैः। अहो कियतीं नाम लज्जां नावहन्त्येतानि ते 'मन्मथः, कन्दर्पः, मदनः' इति दुष्टानि नामानि ?

कामः- कथं मम धर्मपत्नी सत्यपि त्वं मामेवमवमनुषे ?

रतिः- भर्तुरप्यवलिप्तस्य धर्माधर्मजानतः।
उत्पथं प्रतिपन्नस्य भार्या भवति शासिका॥

Ref: ರಾಮಾಯಣ

कामः- आः किम् ?

रतिः- (सावेगम्) आम्। किमितोऽपि दारुणं पापमारभ्यतां केनापि,

यद्भवानुदीरितेन्द्रियं प्रजापतिं स्वसुतायामभिलाषवन्तमकरोत् , अर्थधर्मौ च सिन्धोस्तटावोघ इव प्रवृद्धः पीड्यत्यनवरतम् एकपत्नीशीलाश्च पुंश्चलीकुरुते ।

कामः- अयि कथं नाम मामेवमुपालभसे, यत्प्रसादाज्जगन्त्यानन्दमनुभवन्ति।

रतिः- नैष आनन्दः, तदाभास एव, यं जगन्त्यद्य त्वद्वशंवदान्यनुभवन्ति । कथं नाम तत्र शुभः प्रमोदस्संपद्येत, यत्र नाहं रतिर्बद्धभावास्मि । त्वमद्यकोऽप्युन्मादो व्याधिर्वा जनानाम् । म्रियन्ते च जनास्त्वया पराक्रान्ताः, यतो मन्ये, त्वमपि मार इति प्रथसे लोकेषु ।

(ततः प्रविशति कामस्य सखा मधुः)

कामः- सखे मधो, काले समागतं त्वया। अद्य वयस्यसाहाय्यशरणोऽस्मि । अकाण्डे प्रतीपतां गता प्रियतमा भूताविष्टेव तत्तत् प्रलपति, निन्दति मां, मन्ये नानुयास्यति च मां मदीयजैत्रयात्रायाम् । एतस्यास्सान्त्वनभारः त्वयि न्यस्तः ।

(इत्युक्त्वा निष्क्रान्तः कामः)

मधुः- सखि ! किं करोतु तपस्वी तव कान्तः, यदि त्वं तस्य सामिधेनी नानुगच्छसि ?

रतिः- कथं निर्लज्जं पापप्रवृत्तिषु साहाय्याय त्वमपि मां निमन्त्रयसे ?

मधुः- किमिदम् , अश्रुतपूर्वाः पापपुण्यविवेका निष्पतन्ति ते वदनात् ? किमत्र पापम् ?

रतिः- अपेहि। अनुरूपो वयस्यस्त्वम् । नाहं सहे क्षणमपि तवावलोकनं, सन्निकर्षं वा । तदाहमनुव्रता भविष्यामि मे भर्तुः, यदा स रक्षो देवो भविता ।

मधुः- भगवान् मकरकेतनस्ते रक्षः ! मां पुनः कथं वर्णयिष्यति भवती?

रतिः- वसन्त इति मृषा ते नाम। यतोन त्वया लोको वसति, किन्तु म्रियत एव। सत्यं त्वं कालविशेषः। ✓

मधुः- भर्तारमपहाय च न जाने किं वा भवती विधित्सतीति।

रतिः- तपश्चरिष्यामि। अद्य तपस उद्युञ्जानामेव मां सखा ते विहन्ति स्म। पश्य, इतस्समाधय उपविष्टास्मि।

(इति समाधिमास्थिता रतिः। निष्क्रान्तश्च मधुः)

(प्रविशति कतिपयनिमेषानन्तरं नन्दी शिवगणान्तरं च)

paraphrasing Kalidasa

नन्दी- यदा पितुरवमानेन प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी सती योगवियुक्तदेहा पुनर्जन्मने शैलवधूं प्रपेदे, तदा प्रभृत्येव विमुक्तसङ्गः पतिः पशूनामप्यपरिग्रहस्सन्, अकामोऽपि केनापि कामेन, स्वयं विधातापि तपसः फलानां, स्वयं हिमाद्रेः प्रस्थे कठोरे तपसि वर्तते। स च स्वतपसोऽपि कठोरतरेण कुतोऽपि प्रवृत्तेत तपसा सहसा भिद्यमानसमाधिराज्ञापयन्मां 'नन्दिन्! कः कुत्रैवमस्माकमपि ह्रीपदमादधानमनुत्तमं तप आतिष्ठत इति ज्ञात्वागच्छ' इति। तदाज्ञानुवर्तिना च मया सर्वोऽपि हिमाद्रिः विचितः, भ्रान्ता इतरे पर्वताः, निपुणं निरीक्षितं च दण्डकादिवनेषु। तपः कुतः केवलभोगभूमौ देवलोके? तथापि कयापि शक्त्या समाकृष्ट इत आगतोऽहम्। मार्गितप्रायस्स्वर्लोकश्च। अयं च तपःशत्रोः प्रद्युम्नस्य प्रासादः। हन्त कथमत्र किमपि ज्योतिस्तपति?! एहि प्रविश्य विलोकयावः।

(उभौ निरूपयतः)

गणान्तरम् - भगवन्नन्दिन्, स्त्री हि तपस्यति!

नन्दी- अहो

पदं सहेत भ्रमरस्य पेशलं
शिरीषपुष्पं न पुनः पतत्त्रिणः ।
तपः शरीरैः कठिनैरुपार्जितं
तपस्विनां दूरमधःकरोत्यसौ ॥

Ref: क्र. ५० (V)

सैषा मीनकेतनस्य महिषी भगवती रतिः । कथमियं भर्तुरन्तिक एव वर्तमानाप्यद्यैवमेकाकिनी प्रसंख्याने प्रविष्टा । दुःशकमत्रैतस्यास्तपोऽग्निता प्रदीप्ते स्थाने क्षणमपि स्थातुमस्माभिः । एहि निवेदयावो भगवत एव । मन्ये, तमुद्दिश्यैव तपस्यत्येषा ।

(इति निष्क्रान्तौ)

(ततः प्रविशतः रतेश्चेट्यौ धर्मसंवर्धनी अर्थसखी च)

धर्मसंवर्धनी- हञ्जे, अर्थसखि, नूनमत्युत्तमं तपस्तप्यते देव्या । अद्य स्वर्लोकवीथीष्वटन्त्येवमेवं वार्ता अश्रौषम् - भूम्यां गृहिण्यो भर्तृषु विमुखाश्शौचमातिष्ठन्ते । कामिन्यश्च त्यक्तकामकथा व्रतपरायणा जाताः । उन्मादिन इव च भ्रमन्ति दरिद्राणगात्रा नायका इति ।

अर्थसखी- मया च श्रुतं, पण्याङ्गना अपि धनिष्वागतेष्वपि अनास्थाः पुराणश्रवणाय देवायतनानि गच्छन्तीति ।

धर्मस०- मन्ये सर्वमेतदस्मत्स्वामिनो रतिमन्मथयोर्विप्रयोगेण, देव्यास्तपसा च ।

अर्थस०- किमन्यदत्र कारणम् ? परन्तु जाने, कदा वा देवी समाधेरुत्थास्यति, उपोषिता लोकाश्च सुखपारणां करिष्यन्तीति ।

धर्मस०- सखि, कोऽपि देव आगच्छतीव । भवितव्यं भगवता शशाङ्कशेखरेण

अर्थस०- सत्यम् , निटिलनयनो हर एव आयाति । एहि, इतोऽपसृत्य स्थास्यावः।

(इति किञ्चिदपसृत्य तिष्ठतः)

(प्रविशति भगवान् परमेश्वरः)

परमेश्वरः- इयं सा, यस्यास्तपो मदीयमपि तपो दूरमधःकृत्य, मामप्यत्राचकर्ष । दुर्ललितस्य भर्तुः पापानां भार्या स्वयं प्रायश्चित्तं कुरुते । सैषा मदीयस्य आनन्दस्य विवर्तः, यं जना रतिमाहुः, यां च दुर्विनीतः कामः बलात्साहर्च्ये नियोजयितुं यतते, न शक्नोति च तथा कर्तुम् ।

(दृष्ट्वा परंज्योतिरुपारता रतिः अक्षिन्युन्मील्य पश्यति । पश्यति पुरश्च तदेव परं ज्योतिः परमेश्वरपेण)

रतिः- धर्मेणार्थेन मोक्षेण सामरस्यं दधाति यः ।
तादृक्कामस्वरूपाय नमो योगेश्वराय ते ॥

(इति नमस्करोति)

परमेश्वरः- अयि, किमर्थमेवं तप आहतम् ?

रतिः- भगवन् , धर्मसंमोहे निपतितास्मि -
अधर्मे वर्तमानस्य भर्तुस्त्यागः किमिष्यताम् ।
उतैतत्साहचर्येण पाप एव निपत्यताम् ॥

परमेश्वरः- आयुष्मति ! न भर्तृपरित्यागः शोभते । नतरां शोभते पापासाहचर्यम् । तमनुप्रविश्य सान्त्वैरुपायान्तरैश्च कुशलया भार्यया उच्छृङ्खलं धावन्भर्ता निगृहीतव्यः । लोहान्तरैः धातुभिश्च दूषितमिति न हेम परित्यक्तव्यं, किन्तु पाकेन शोधयितव्यम् ।

रतिः- अनार्यमब्रह्मण्यमेष मे भर्ता चरति। तपस्विनः, पूज्यान्देवान् , सतीश्च देवतोपमाः व्याकुलयति । वन्ध्या मे प्रार्थनाः । न जाने कथं वायं शुद्ध्यतीति । सर्वमेव धातुपिण्डं, न किञ्चिदत्र हेमेति भाति ।

परमेश्वरः- अलं नैराश्येन ।

रतिः- भगवतश्चरणमेव शरणम् ।

परमेश्वरः- जाते, यस्मिन् पापे जनः प्रवृत्तः, तत्रैव परां काष्ठां नीत्वा तत् पापं विनाशयितव्यम् । यदेष ते भर्ता प्रजापतिं स्वसुतायां प्रेरयामास, यश्च ऋषीन् सतीश्च च्यावयति चारित्रात् , तत् फल्गु । तथाहं सन्दर्भे घटयिष्यामि, यथैष दुर्विदग्धो मय्येव निजास्त्रबलं प्रकटयिष्यति । तदैष मदीयनिटिलाक्षिनिष्पतितेन वैराग्यमयतेजसा दग्धः, भस्मनि निहितः, विदुतसर्वमलः, नवोदितार्क इव उद्योतमान उत्थास्यति । तदा स तवानुरूपो भर्ता, ममाप्यनुकूलः प्रियस्सेवको भविष्यति । युवयोश्च तदा शमस्तुष्टिश्चेति पुत्रः पुत्री च भविष्यतः । अस्माकं मनसः प्रथमं रेतो ह्येतत् , यत्काममाहुर्लोकाः, सर्वस्या अपि सृष्टेर्बीजम् । तस्य शोधनमस्माकमवश्यकार्यतया प्राप्तम् । नाद्याप्यहमेनमङ्गीकृतवान् । अरूपहार्यस्सन् , अनङ्गीकृत्यैव मत्सन्निधाने तमनुज्ञास्यामि । अशुद्ध एव कामः पुमथान्तराणमङ्गम् । शुद्धः पुनरनङ्गः, अङ्गी, स्वयं परमः पुरुषार्थः ।

रतिः- अनुगृहीतास्मि भगवन् । अहमपि भर्तुर्नवावतारं प्रतिपालयन्ती तपस्येवमेव वर्ते ।

परमेश्वरः- वर्तस्व वत्से । तपो हि परमं साधनं, तपो हि कुरुते सर्वं, तपो हि

धारयति पृथिवीं, तपो हि लक्ष्मीः, तपोह्यानन्दः। किमितोऽप्याशास्यम् -

(भरतवाक्यम्)

ज्ञानाग्निपरिपूतो यः सर्वक्षेमैककल्पकः।
स वः प्रकाशतां कामः मत्स्वरूपादनन्तरः ॥

(साञ्जलि रतिस्तिष्ठति। साभयहस्तं परमेश्वरः। पतति यवनिका)